**आदर्शप्रश्नपत्र-प्रारूपम्**

**सत्रम् 2024 -2025**

**कक्षा नवमी**

**विषयः संस्कृतम्**

**समयः होरात्रयम्** **पूर्णांकाः 80**

| | **खण्ड 'क'**<br>**बहुविकल्पात्मक-प्रश्नाः** | **16 अङ्काः** |
|---|---|---|
| **प्रश्न-1.** | **अधोलिखित-षोडश-प्रश्नानाम् उत्तराणि प्रदत्तेभ्यः विकल्पेभ्यः चिनुत।**<br>**1. संस्कृते …………… पुरुषाः सन्ति।**<br>**(क) त्रयः** **(ख) तिस्रः**<br>**(ग) त्रीणि** **(घ) चत्वारि**<br>**2. शेमुषी (प्रथमो-भागः) इत्यस्य षष्ठः पाठः कः?**<br>**(क) भ्रान्तो बालः** **(ख) लौहतुला**<br>**(ग) सूक्तिमौक्तिकम्** **(घ) सिकतासेतुः**<br>**3. "जन्तवः, नद्यः, विभूतयः, परितः" इत्यत्र भिन्नप्रकृतिकं पदं चित्वा लिखत।**<br>**(क) जन्तवः** **(ख) नद्यः**<br>**(ग) परितः** **(घ) विभूतयः**<br>**4. चन्दनः नारीस्वतन्त्रतायाः ……………… आसीत्।**<br>**(क) समर्थकः** **(ख) कल्याणकारिणः**<br>**(ग) विरोधी** **(घ) प्रबन्धः**<br>**5. 'गौः' इत्यस्य शब्दस्य कोऽर्थः?**<br>**(क) वृषभः** **(ख) काकः**<br>**(ग) धेनुः** **(घ) पिकः**<br>**6. 'जले चरन्ति इति'' इत्यस्य कृते एकपदवाचि-पदं चिनुत।**<br>**(क) नभचराः** **(ख) निशाचराः**<br>**(ग) स्थलचराः** **(घ) जलचराः**<br>**7. <u>त्रयाणां लोकानां समाहारः</u> इत्यस्य समस्तं पदं चिनुत।**<br>**(क) त्रिलोकी** **(ख) त्रिलोकसमाहारः**<br>**(ग) लोकत्री** **(घ) त्रिलोकानाम्**<br>**8. 'आशु' इत्यस्य पर्यायपदं चिनुत।**<br>**(क) श्रेष्ठः** **(ख) मन्दम्**<br>**(ग) शीघ्रम्** **(घ) शनैः शनैः** | **1×16=16** |

| | | | |
|---|---|---|---|
| | **9. जानाम्यहम् इत्यस्य सन्धि-विच्छेद-पदं चिनुत।**<br>**(क) जानाम्+यहम्** **(ख) जानाम्य+अहम्**<br>**(ग) जानाम्य+अहम्** **(घ) जानामि+अहम्**<br>**10. 'व' इत्यस्य उच्चारणस्थानं प्रदत्त-विकल्पेभ्यः चिनुत।**<br>**(क) ज्ञानवान्** **(ख) ज्ञानवन्तौ**<br>**(ग) ज्ञानवन्तः** **(घ) ज्ञानवानाः**<br>**11.परिश्रमेण छात्राः ज्ञान+मतुप् भवन्ति।**<br>**(क) लिखन्** **(ख) लिखति**<br>**(ग) लिखत** **(घ) लिखन्ती**<br>**12.लिख्+शतृ छात्रः इतस्ततः पश्यति।**<br>**(क) लिखन्** **(ख) लिखति**<br>**(ग) लिखत** **(घ) लिखन्ती**<br>**13............. नमः।**<br>**(क) दुर्गाम्** **(ख) दुर्गायै**<br>**(ग) दुर्गाय** **(घ) दुर्गायाः**<br>**14.सा राधिका ..........।**<br>**(क) अस्ति** **(ख) स्तः**<br>**(ग) असि** **(ग) अस्मि**<br>**15.शिवयोः इत्यस्य पद-परिचयम्-**<br>**(क) शिव शब्दः, प्रथमा विभक्तिः, द्विवचनम्।**<br>**(ख) शिव शब्दः, षष्ठी विभक्तिः, द्विवचनम्।**<br>**(ग) शिव शब्दः, द्वितीया विभक्तिः, द्विवचनम्।**<br>**(घ) शिव शब्दः, तृतीया विभक्तिः, द्विवचनम्।**<br>**16.अपश्यत इत्यस्य पद-परिचयम्-**<br>**(क) दृश् धातोः, लङ्लकारः, प्रथम-पुरुषः, एकवचनम्।**<br>**(ख) दृश् धातोः, लङ्लकारः, मध्यम-पुरुषः, बहुवचनम्।**<br>**(ग) दृश् धातोः, लङ्लकारः, मध्यम-पुरुषः, बहुवचनम्।**<br>**(घ) दृश् धातोः, लङ्लकारः, प्रथम-पुरुषः, एकवचनम्।** | |
| | **खण्ड 'ख'**<br>**अपठित-अवबोधनम्** | **10 अङ्काः** |
| **प्रश्न-2.** | **अधोलिखितम् अनुच्छेदम् अधिकृत्य निर्देशित-प्रश्नानाम् उत्तराणि दीयन्ताम्।**<br>**विज्ञानस्य नवीनेषु आविष्कारेषु एकः अतीव उपयोगी आविष्कारः अस्ति-चलभाषियन्त्रम् (मोबाइल इति।) अस्य मुख्य प्रयोजनमासीत् दूरवर्तिना केनापि जनेन सह वार्तालापः सुकरः भवेत् इति। परमद्यत्वे तु चलभाषियन्त्र लघुसङ्गणकमिव वर्तते।** | |

| | | |
|---|---|---|
| | एवं प्रातीयते यत् जनाः हस्ते एक सम्पूर्ण जगत् एव नयन्तः गच्छन्ति। अनेन ते न केवलं वार्ता कुर्वन्ति अपितु वार्तया सहैव वक्तारं साक्षात् पश्यन्त्यपि। ईमेल-फेसबुक-व्हाट्सएप-माध्यमैः एतदतीव सुकर संदेशवाहकमपि। अस्य माध्यमेन गमनागमनार्थं शीघ्रमेव वाहनं प्राप्य जनाः सरलतया स्वगन्तव्यं प्राप्नुवन्ति। न केवलमेतदेव अपितु एतत् यन्त्र मनोरञ्जनकारि अपि। बालाः, वृद्धाः युवानः अस्य माध्यमेन विविधक्रीडाभिः मनोरञ्जनक्षमाः भवन्ति। परमेतदपि विचारणीयं यस्य अधिकाधिक प्रयोगः हानिकरः भवति। 'अति सर्वत्र वर्जयेत्' इत्यनुरूपेण अस्य यथावश्यकं प्रयोगः एव करणीयः।<br><br>(1) एकपदेन उत्तरत –<br>(क) किम् अतीव सुकर सन्देशवाहकम्?<br>(ख) जनाः वार्तया सह साक्षात् कं पश्यन्ति?<br>(2) पूर्णवाक्येन उत्तरत –<br>(क) अस्य मुख्यं प्रयोजन किमस्ति?<br>(3) निर्देशानुसारं उत्तरत –<br>(क) 'केनापि जनेन सह वार्तलापः सुकरः भवेत्' अत्र विशेषणपदं किम्?<br>(ख) 'अस्य यथावश्यकं प्रयोगः एव करणीयः' इति अत्र किं क्रियापदम्? | <br><br><br><br><br><br><br><br>1×2=2<br><br><br>1×1=1<br><br>1×2=2 |
| प्रश्न-3. | अधोलिखितम् अनुच्छेदं पठित्वा अनुच्छेदाधारित-प्रश्नानाम् उत्तराणि दीयन्ताम्।<br>श्री जवाहरलाल-नेहरुः महापुरुषः आसीत्। सः देशभक्तः जननायकः च आसीत्। सः बाल्ये उच्च शिक्षायै आङ्गलदेशम् अगच्छत्। सः भारते आगम्य देशसेवायां संलग्नः अभवत्। सः गान्धी-महोदयेन चालिते सत्याग्रहे सम्मानितः अभवत्। तदैव सः भारतस्य ग्रामे-ग्रामे अगच्छत्। सः सर्वान् जनान् अबोधयत् येन जनाः स्वतन्त्रतायाः प्राप्तये यत्नं कुर्वन्तु। जनाः भारतस्य स्वतन्त्रतायै उद्यताः अभवन्। सः सर्वं सुखम् अत्यजत्। सः बहुवारं कारागारम् अगच्छत्।<br>(1) एकपदेन उत्तरत-<br>(क) महापुरुषः कः आसीत्?<br>(2) पूर्णवाक्येन उत्तरत-<br>(क) जवाहरलालः कुत्र सम्मानितः अभवत्?<br>(3) गद्यांशं पठित्वा तृतीयांशतुल्यं सारं लिखत।<br>(4) प्रदत्त-गद्यांशस्य उचितं शीर्षकं लिखत।<br>(क) शिक्षायै (ख) सत्याग्रहे सम्मानितः<br>(ग) जवाहरलाल-नेहरुः (घ) गान्धी-महोदयः | <br><br><br><br><br><br><br>1×1=1<br><br>1×1=1<br><br>1×2=2<br>1×1=1 |
| | खण्ड 'ग'<br>रचनात्मक-कार्यम् | 10 अङ्काः |
| प्रश्न-4. | मञ्जूषातः पदानि विचित्य रिक्तस्थानानि पूरयित्वा प्रधानाचार्यमहोदयस्य कृते विद्यालये प्रवेशार्थं प्रार्थना – पत्रं लिखत – | 5×1=5 |

| | | |
|---|---|---|
| | सविनयम्, दूरे, सधन्यवादः, मान्यवर, गृहे, प्रदाय, प्रधानाचार्यमहोदयाः, दशमकक्षायाम्, विद्यालये, आज्ञाकारी। | |
| | सेवायाम्<br>श्रीमन्तः (1) ...............<br>राजकीय वरिष्ठ माध्यमिक विद्यालयः<br>अ.ब.स.<br>(2) ...............<br>(3) ............... निवेदनम् इदम् अस्ति यत् अहम् (4) ...............95% अङ्कान् लब्धवा उत्तीर्णजातः। अस्माभिः स्वनिर्मिते (5) ............... ह्यः एव प्रवेशः कृतः । मम् गृहं पूर्व विद्यालय इव पञ्चदश कोश पर्यन्तं (6) ...............अस्ति अहम् विज्ञानक्षेत्रे भवताम् (7) ...............प्रवेष्टुम् इच्छामि । कृपया मह्यम् स्वीकृतीं (8) ............... अनुगृह्णवन्तु।<br>(9)..............................<br>भवताम (10) ............... शिष्यः<br>क.ख.ग. । | |
| प्रश्न-5. | अधोलिखितेषु विषयेषु एकं विषयम् अधिकृत्य संस्कृत-भाषायां लघुनिबन्धं लिख्यन्ताम्।<br>(क) विजयादशमी<br>(ख) दीपावली<br>(ग) पर्यावरणम् | 5×1=5 |
| | खण्ड 'घ'<br>अनुप्रयुक्त-व्याकरणम् | 24 अङ्काः |
| प्रश्न-6. | अधोलिखित-पदानां सन्धिं/सन्धिविच्छेदं वा कुरुत । (केवलं प्रश्नचतुष्टयम्)<br>(क) शिवास्ते = ..........+..........।<br>(ख) नि+अवसत् =...............।<br>(ग) सप्ताहान्ते = ..........+..........।<br>(घ) सूर्य+उदयः =...............।<br>(ङ) अत्युत्तमः = ..........+..........। | 1×4=4 |
| प्रश्न-7. | अधोलिखितानां वर्णानां समुचितं उच्चारणस्थानं लिखत।<br>(केवलं प्रश्नचतुष्टयम्)<br>(क) आ = ............. ।<br>(ख) व = ...............।<br>(ग) फ = ..............।<br>(घ) ल = ..............।<br>(ङ) झ = ..............। | 1×4=4 |
| प्रश्न-8. | अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं | 1×4=4 |

| | | |
|---|---|---|
| | लिखत। (केवलं प्रश्नचतुष्टयम्)<br>(क) पठ्+शतृ छात्रः इतस्ततः पश्यति।<br>(ख) पुत्रः पितरं प्रणम्य विद्यालयं गतवान्।<br>(ग) मुद्+शानच् ते गायन्ति।<br>(घ) सिंहः मृगं खादितुम् इच्छति।<br>(ङ) नृपेण प्रजाः पाल्+अनीयर्। | |
| प्रश्न-9. | अधोलिखितवाक्येषु वाक्यानुगुणं शब्द-रूपाणां विभक्ति-वचनम् अधिकृत्य समुचितं पदं लिखत । (केवलं प्रश्नचतुष्टयम्)<br>(क) ............चित्रं पश्यन्ति।(कवि प्रथमा)<br>(ख) ............नमः। (दुर्गा चतुर्थी)<br>(ग) ........... विद्यालयम् अगच्छन्। (छात्र प्रथमा )<br>(घ) ............वन्दनीयौ। (पितृ प्रथमा )<br>(ङ) ............ विद्यालयं चलिष्यथ। (युष्मद् प्रथमा ) | 1×4=4 |
| प्रश्न-10. | अधोलिखितवाक्येषु वाक्यानुगुणं धातुरूपाणां पुरुष-वचनम् अधिकृत्य समुचितं पदं लिखत ।(केवलं प्रश्नचतुष्टयम्)<br>(क) अद्य वयम् चलचित्रं ............। दृश् धातुः लृट्लकारः<br>(ख) छात्राः निज-पाठम् ............। पठ् धातुः लङ्लकारः<br>(ग) श्वः नदीतीरे वनमहोत्सवः ............। भू धातुः लृट्लकारः<br>(घ) त्वं विद्यालयं.........। गम् धातुः विधिलिङ्लकारः<br>(ङ) इदानीं अहं किं ............। कृ धातुः लट्लकारः | 1×4=4 |
| प्रश्न-11. | अधिलिखित-पदानां समुचितं पद-परिचयं विधीयन्ताम् – (केवलं चतुर्णाम् )<br>कृष्णैः, तेषाम्, हरये, अलिखत, द्रक्ष्यावः, पठ । | ½×4= 2 |
| प्रश्न-12. | अधोलिखितवाक्येषु रेखाङ्कितपदानां समस्तपदं विग्रहपदं वा लिखत ।(केवलं चतुर्णाम् )<br>(क) बालकः स्नानस्य उपकरणम् आदाय अभ्यागतेन सह प्रस्थितः ।<br>(ख) लवः विद्याभ्यासाय गुरुगृहम् अगच्छत् ।<br>(ग) पीतानि अम्बराणि यस्य सः वैकुण्ठे वसति ।<br>(घ) नीलकण्ठः नाम शिवः ।<br>(च) पितरौ बन्दनीयौ । | ½×4= 2 |
| | खण्ड 'ङ'<br>पठित-अवबोधनम् | 20 अङ्काः |
| प्रश्न-13. | पठित-गद्य-पद्य-आधारित-अवबोधनकार्यम्- | |
| (अ) | अधोलिखित-पठित-अनुच्छेदम् अधिकृत्य निर्देशित-प्रश्नानाम् उत्तराणि दीयन्ताम्।<br>सः श्रेष्ठी पृष्टवान्- “भोः! अभ्यागत! कथ्यतां कुत्र मे शिशुः यः त्वया सह नदीं गतः"? इति। स अवदत् - "तव पुत्रः नदीतटात् श्येनेन हृतः' इति। श्रेष्ठी अवदत् - "मिथ्यावादिन्! किं क्वचित् श्येनो बालं हर्तुं शक्नोति? तत् समर्पय मे सुतम् अन्यथा राजकुले निवेदयिष्यामि।" इति। सोऽकथयत्-“भोः सत्यवादिन्! यथा श्येनो बालं न नयति, तथा मूषका अपि लौहघटितां तुलां न भक्षयन्ति। तदर्पय मे तुलाम्, यदि | |

| | | |
|---|---|---|
| | दारकेण प्रयोजनम्।" इति।<br><br>(1) एकपदेन उत्तरत –<br>(क) के लौहघटितां तुलां न भक्षयन्ति?<br>(ख) तव पुत्रः नदीतटात् केन हृतः?<br>(2) पूर्णवाक्येन उत्तरत –<br>(क) श्रेष्ठी किं पृष्टवान्?<br>(3) निर्देशानुसारं उत्तरत –<br>(क) " मूषकाः अपि लौहघटितां तुलां न भक्षयन्ति।" वाक्येऽस्मिन् कर्तृपदं किम्?<br>(ख) "अभ्यागतः" इत्यस्य सन्धि-विच्छेदं कुरुत। | 1×2=2<br><br>1×1=1<br><br>1×2=2 |
| (आ) | अधोलिखितम् पद्यांशम् अधिकृत्य निर्देशित-प्रश्नानाम् उत्तराणि दीयन्ताम्।<br>गुणा गुणज्ञेषु गुणा भवन्ति<br>ते निर्गुणं प्राप्य भवन्ति दोषाः।<br>सुस्वादुतोयाः प्रवहन्ति नद्यः<br>समुद्रमासाद्य भवन्त्यपेयाः।।<br>(1) एकपदेन उत्तरत –<br>(क) गुणाः कुत्र भवन्ति?<br>(ख) सुस्वादुतोयाः काः प्रवहन्ति?<br>(2) पूर्णवाक्येन उत्तरत –<br>(क) समुद्रमासाद्य नद्यः कीदृशाः भवन्ति?<br>(3) निर्देशानुसारं उत्तरत –<br>(क) "गुणाः" इति पदस्य अत्र विलोमपदं किम्?<br>(ख) "भवन्त्यपेयाः" इत्यस्य सन्धि-विच्छेदं कुरुत। | 1×2=2<br><br>1×1=1<br><br>1×2=2 |
| प्रश्न-14. | पठित-गद्य-पद्ययोः हिन्दी-भाषायाम् अनुवादः। | |
| (अ) | अधोलिखित-गद्यांशयोः कस्यचिद् एकस्य गद्यांशस्य सप्रसङ्गं हिन्दी-भाषायाम् अनुवादं विधीयन्ताम् ।<br>(क) चन्दनः - नमस्करोमि तात! पञ्चदश घटान् इच्छामि। किं दास्यसि ?<br>देवेशः - कथं न? विक्रयणाय एव एते। गृहाण घटान्। पञ्चशतोत्तर-रूप्यकाणि च देहि।<br>चन्दनः - साधु। परं मूल्यं तु दुग्धं विक्रीय एव दातुं शक्यते। देवेशः -क्षम्यतां पुत्र! मूल्यं विना तु एकमपि घटं न दास्यामि ।<br><br>(ख) धर्मो रक्षति रक्षितः इत्यार्षवचनम्। पर्यावरणरक्षणमपि धर्मस्यैवाङ्गमिति ऋषयः प्रतिपादितवन्तः। अतएव वापीकूपतडागादिनिर्माणं देवायतन-विश्रामगृहादिस्थापनञ्च धर्मसिद्धेः स्रोतो रूपेण अङ्गीकृतम्। कुक्कुर- सूकर-सर्प-नकुलादि-स्थलचराः, मत्स्य-कच्छप-मकरप्रभृतयः जलचराश्च अपि रक्षणीयाः, यतः ते स्थलमलानाम् अपनोदिनः जलमलानाम् अपहारिणश्च । प्रकृतिरक्षया एव लोकरक्षा सम्भवति इत्यत्र नास्ति संशयः। | 3×1=3 |

| | | |
|---|---|---|
| (आ) | **अधोलिखित-पद्यांशयोः कस्यचिद् एकस्य पद्यांशस्य प्रसङ्गसहितं हिन्दी-भाषायाम् अनुवादं विधीयन्ताम् ।**<br><br>**(क) ललित-पल्लवे पादपे पुष्पपुञ्जे<br>मलयमारुतोच्चुम्बिते मञ्जुकुञ्जे,<br>स्वनन्तीन्ततिम्प्रेक्ष्य मलिनामलीनाम्।।<br>निनादय...।।**<br><br>**(ख) स भग्नधन्वा विरथो हताश्वो हतसारथिः।<br>तलेनाभिजघानाशु जटायुं क्रोधमूच्छितः॥** | **3×1=3** |
| **प्रश्न-15.** | **रेखाङ्कितपदमाधृत्य अधोलिखित-वाक्यानां प्रश्ननिर्माणं कुरुत।**<br>**(क) ग्रामे *निर्धना स्त्री* अवसत ।**<br>**(ख) धनवृष्ट्या कोऽपि दरिद्रः नातिष्ठत्।**<br>**(ग) श्रेष्ठिनः शिशुः स्नानोपकरणमादाय *अभ्यागतेन* सह प्रस्थितः।**<br>**(घ) *गुरुगृहं* गत्वैव विद्याभ्यासः करणीयः।**<br>**(ङ) प्रकृतिः *जीवनसुखं* प्रददाति।** | ½×**4= 2** |
| **प्रश्न-16.** | **अधोलिखित-पदेषु भिन्नवर्गीयं पदं चिनुत।**<br>**(क) निःश्वस्य, चिन्तय, विमृश्य, उपेत्य।**<br>**(ख) विश्वसिमि, पश्यामि, करिष्यामि, अभिलषामि।**<br>**(ग) तपोभिः, दुर्बुद्धि, सिकताभिः कुटुम्बिभिः ।**<br>**(घ) अधिरोढुम्, गन्तुम्, सेतुम्, निर्मातुम्।** | ½×**4= 2** |

✿✿✿✿✿✿✿✿✿✿✿✿✿✿✿✿✿✿✿✿✿✿✿✿✿✿✿✿✿✿✿✿✿✿✿✿✿

**प्रश्ननिर्माणकर्ता अशुद्धिसंशोधकश्च**

**आचार्य नरेश मलोटिया**

**टीजीटी-संस्कृतम्**

**राजकीय-उत्कृष्ट-वरिष्ठ-माध्यमिक-विद्यालयः (कन्या) नादौनः**

**डाकगृहम्- नादौनः, मण्डलम्- नादौनः, जनपदः- हमीरपुरः**

**(हिमाचल प्रदेशः)- 177033**

**दूरवाणी- सङ्केतः- 9817707260, 8351007260**

**अणु-सङ्केतः [ggsssnadaun@rediffmail.com](mailto:ggsssnadaun@rediffmail.com)**

**डॉ. अमन शर्मा**

**टीजीटी-संस्कृतम्**

**राजकीय-उच्च-विद्यालयः चामुक्खा**

**डाकगृहम्- चामुक्खा, मण्डलम्- रक्कड़ः, जनपदः- काङ्गड़ा**

**(हिमाचल प्रदेशः)- 177033**

**दूरवाणी- सङ्केतः- 8894337243, 8219973147**

**अणु-सङ्केतः [ghschamukha123@gmail.com](mailto:ghschamukha123@gmail.com)**

**आदर्शप्रश्नपत्र-प्रारूप-रूपरेखा**

**सत्रम् 2024 -2025**

**कक्षा नवमी**

**विषयः संस्कृतम्**

**समयः होरात्रयम्** **पूर्णांकाः 80**

**खण्डविभाजनम्**

| | | |
|---|---|---|
| खण्ड 'क' | "बहुविकल्पात्मक-प्रश्नाः" | 16 अङ्काः |
| खण्ड 'ख' | "अपठित-अवबोधनम्" | 10 अङ्काः |
| खण्ड 'ग' | "रचनात्मक-कार्यम्" | 10 अङ्काः |
| खण्ड 'घ' | "अनुप्रयुक्त-व्याकरणम्" | 24 अङ्काः |
| खण्ड 'ङ' | "पठित-अवबोधनम्" | 20 अङ्काः |
| | कुल-अङ्काः | 80 अङ्काः |

| | | |
|---|---|---|
| | **खण्ड 'क'**<br>**बहुविकल्पात्मक-प्रश्नाः** | **16 अङ्काः** |
| **प्रश्न-1.** | **प्रथमे प्रश्ने षोडश बहुविकल्पात्मक-प्रश्नाः भविष्यन्ति, तत्रापि पञ्च प्रश्नाः "शेमुषी प्रथमो भाग:" इत्येतम् अधिकृत्य, दश प्रश्नाः व्याकरणम् अनुसृत्य तथा च एकं प्रश्नं संस्कृतस्य सामान्य- बिन्दूनां विषये भविष्यति।**<br>**बहुविकल्पात्मक-प्रश्नाः**<br>**(1) प्रथमः प्रश्नः "सामान्य संस्कृतम्"**<br>**संस्कृतस्य मूलभूत-परिचयात्मक-बिन्दूनां ज्ञानम् (लिङ्ग- विभक्ति- वचन- पुरुष- कारकादि)**<br><br>**(2) 2 तः 6 प्रश्नपर्यन्तम् "शेमुषी प्रथमो भाग:"**<br>**द्वितीय प्रश्नः पाठस्य नाम, द्वौ प्रश्नौ प्रथम-पाठतः पञ्चम-पाठ-पर्यन्तं प्रदत्त-अभ्यासेभ्यः तथा च द्वौ प्रश्नौ षष्ठ-पाठतः दशम-पाठ-पर्यन्तं प्रदत्त-अभ्यासेभ्यः भविष्यन्ति। अत्र द्वौ प्रश्नौ सामान्यतः कठिनौ भवेताम्।**<br><br>**(3) 6 तः 16 प्रश्नपर्यन्तम् "व्याकरण-भाग:"**<br>**सन्धि- उच्चारणस्थान- प्रत्यय- शब्दपरिचय- धातुपरिचय- समासाधारित दश प्रश्नाः भविष्यन्ति।** | **1×16=16** |

| | | |
|---|---|---|
| | | |
| | **खण्ड 'ख'**<br>**अपठित-अवबोधनम्**<br>**(अपठित-सरलगद्यांश-आधारित-कार्यम् :- गद्यांशद्वयम्)** | **10 अङ्काः** |
| **प्रश्न-2.** | **40-50 शब्द-परिमितः एकः अपठितः सरल-गद्यांशः**<br>**(1) एकपदेन प्रश्नोत्तर-द्वयम्**<br>**(2) पूर्णवाक्येन प्रश्नोत्तरम्**<br>**(3) भाषिक-कार्यम् (निर्देशानुसार-प्रश्नोत्तर-द्वयम्)** | <br>**1×2=2**<br>**1×1=1**<br>**1×2=2** |
| | **भाषिक-कार्यम् =>**<br>**वाक्ये क्रियापद-चयनं, कर्तृक्रिया-अन्वितिः, विशेषण-विशेष्य-अन्वितिः, सञ्ज्ञास्थाने सर्वनाम-प्रयोगः, सर्वनामस्थाने सञ्ज्ञा-प्रयोगः, पर्यायपदं विलोमपदं वा दत्त्वा अनुच्छेदे प्रदत्तं पद-चयनं, पद-परिचयः, सन्धिं/सन्धि-विच्छेदं वा, समस्त-पदानां विग्रहः विग्रह-पदानां च समासः, प्रकृति-प्रत्ययौ, उपसर्ग-चयनञ्च।** | |
| **प्रश्न-3.** | **80-100 शब्द-परिमितः एकः अपठितः सरल-गद्यांशः (सरलकथा प्रसिद्ध-घटना वर्णनं वा)**<br>**(1) एकपदेन प्रश्नोत्तर-द्वयम्**<br>**(2) पूर्णवाक्येन प्रश्नोत्तरम्**<br>**(3) गद्यांशस्य तृतीयांश-तुल्यं सारम्**<br>**(4) गद्यांशस्य समुचित-शीर्षकम्** | <br><br>**1×1=1**<br>**1×1=1**<br>**2×1=2**<br>**1×1=1** |
| | **खण्ड 'ग'**<br>**रचनात्मक-कार्यम्** | **10 अङ्काः** |
| **प्रश्न-4.** | **सङ्केताधारित-अनौपचारिक-पत्रम्** | **½×10=5** |
| **प्रश्न-5.** | **निबन्ध-लेखनम् (अनुच्छेद-लेखनम्)** | **5×1=5** |
| | **खण्ड 'घ'**<br>**अनुप्रयुक्त-व्याकरणम्** | **24 अङ्काः** |
| **प्रश्न-6.** | **सन्धि-कार्यम् (चतुर्णां पदानां सन्धिं/सन्धि-विच्छेदं वा)**<br>**(1) स्वर-सन्धिः => दीर्घ, गुण, वृद्धि, यण्, अयादि, पूर्वरूप, पररूप, संयोग इत्यादयः।**<br>**(2) व्यञ्जन-सन्धिः => श्चुत्व, ष्टुत्व, जशत्व, तुक् आगम, अनुस्वार, परसवर्ण, अनुनासिक, वर्गीय-प्रथम-अक्षराणां तृतीयवर्णे पञ्चमवर्णे वा परिवर्तनम् इत्यादयः।**<br>**(3) विसर्ग-सन्धिः => विसर्गस्य स्थाने उत्त्वं, रत्वं, लोपः, शकारः, षकारः, सकारः च।** | **1×4=4** |
| **प्रश्न-7.** | **उच्चारणस्थानानि ( चतुर्णांपदानाम्- उच्चारणस्थानानि लिखत )** | **1×3=3** |
| **प्रश्न-8.** | **प्रत्ययाः (चतुर्णारेखाङ्कितपदानां प्रकृति-प्रत्ययानां संयोजनम् / विभाजनञ्च)**<br>**(1) कृदन्ताः - तव्यत्, अनीयर्, शतृ, शानच्, क्त, क्तवतु, क्त्वा, ल्यप्, तुमुन्।**<br>**(2) तद्धिताः - मतुप्, इन्, ठक्, त्व, तल्।**<br>**(3) स्त्री-प्रत्ययौ - टाप्, ङीप्।** | **1×3=3** |
| **प्रश्न-9.** | **कोष्ठेषु प्रदतानां शब्दानां वाक्यानुगुणं शब्द-रूपाणां विभक्ति-वचनम् लिखत । (केवलं** | **1×3=3** |

| | | |
|---|---|---|
| | प्रश्नचतुष्टयम् ) | |
| प्रश्न-10. | निर्देशित-लकारे धातूनां वाक्यानुगुणं पुरुष-वचनम् अधिकृत्य समुचितं पदं लिखत ।<br>(केवलं प्रश्नचतुष्टयम् ) | |
| प्रश्न-11. | पद-परिचयः (चतुर्णां शब्दानां धातूनाञ्च पद-परिचयः) | ½×4=2 |
| प्रश्न-12. | समासाः (वाक्येषु चतुर्णां समस्त-पदानां विग्रहः विग्रह-पदानां च समासः)<br>(1) तत्पुरुषः (विभक्तिः, नञ्, उपपदः),<br>कर्मधारयः तत्पुरुषः(विशेषण- विशेष्यम्, उपमानउपमेयम्),<br>द्विगुः तत्पुरुषः च।<br>(2) द्वन्द्वः (इतरेतरः, समाहारः, एकशेषः)<br>(3) बहुव्रीहिः (समानाधिकरणम्)<br>(4) अव्ययीभावः (अनु, उप, सह, निर्, प्रति, यथा) | ½×4=2 |
| | खण्ड 'ङ'<br>पठित-अवबोधनम्<br>("शेमुषी-प्रथमो भागः" इति संस्कृत-पाठ्यपुस्तकम् अधिकृत्य पठित-अवबोधनम्)<br>{पाठ्यसामग्री- प्रथमपाठतः दशमपाठ-पर्यन्तम्} | 20 अङ्काः |
| प्रश्न-13. | पठित-गद्य-पद्य-आधारित-अवबोधनकार्यम् | |
| (अ) | 40-50 शब्द-परिमितः एकः पठित-गद्यांशः<br>(संस्कृत-पाठ्यपुस्तके निर्धारित-पाठ्यसामग्रीम् अधिकृत्य)<br>(1) एकपदेन प्रश्नोत्तर-द्वयम्<br>(2) पूर्णवाक्येन प्रश्नोत्तरम्<br>(3) भाषिक-कार्यम् (निर्देशानुसार-प्रश्नोत्तर-द्वयम्) | <br><br>1×2=2<br>1×1=1<br>1×2=2 |
| (आ) | एकः पठितः पद्यांशः (संस्कृत-पाठ्यपुस्तके निर्धारित-पाठ्यसामग्रीम् अधिकृत्य)<br>(1) एकपदेन प्रश्नोत्तर-द्वयम्<br>(2) पूर्णवाक्येन प्रश्नोत्तरम्<br>(3) भाषिक-कार्यम् (निर्देशानुसार-प्रश्नोत्तर-द्वयम्)<br><br>भाषिक-कार्यम् =><br>वाक्ये क्रियापद-चयनं, कर्तृक्रिया-अन्वितिः, विशेषण-विशेष्य-अन्वितिः, सञ्ज्ञास्थाने सर्वनाम-प्रयोगः, सर्वनामस्थाने सञ्ज्ञा-प्रयोगः, पर्यायपदं विलोमपदं वा दत्त्वा अनुच्छेदे प्रदत्तं पद-चयनं, पद-परिचयः, सन्धिं/सन्धि-विच्छेदं वा, समस्त-पदानां विग्रहः विग्रह-पदानां च समासः, प्रकृति-प्रत्ययौ, उपसर्ग-चयनञ्च। | <br>1×2=2<br>1×1=1<br>1×2=2 |
| प्रश्न-14. | संस्कृत-पाठ्यपुस्तके निर्धारित-पाठ्यसामग्रीम् अधिकृत्य हिन्दी-भाषायाम् अनुवादः। | |
| (अ) | एकस्य गद्यांशस्य हिन्दी-भाषायाम् अनुवादः। (रूपरेखा+प्रसङ्ग+सरलार्थः) | (½+½+2=3) |
| (आ) | एकस्य पद्यांशस्य हिन्दी-भाषायाम् अनुवादः। (रूपरेखा+प्रसङ्ग+सरलार्थः) | (½+½+2=3) |
| प्रश्न-15. | रेखाङ्कित-पदमधिकृत्य चतुर्णां वाक्यानां प्रश्ननिर्माणम्। | ½×4=2 |

| | | |
|---|---|---|
| **प्रश्न-16.** | **संस्कृत-पाठ्यपुस्तके निर्धारित-पाठ्यसामग्र्याः अभ्यासमधिकृत्य चतुर्णां पदानां मेलनम् । अभ्यासेषु एतादृशाः अनेके विषयाः सन्ति, तद्यथा-**<br>**> पर्यायपदानां (समानार्थक-पदानां) मेलनम्।**<br>**> विलोमपदानां (विपरीतार्थक-पदानां) मेलनम्।**<br>**> विशेषण-विशेष्यानां मेलनम्।**<br>**> कोष्ठकात् चित्वा पदानाम् अर्थः।**<br>**> शुद्ध-कथनानां समक्षम् "आम्" इति तथा अशुद्ध-कथनानां समक्षम् "न" इति लेखनम्।**<br>**> कोष्ठकात् शुद्धं विकल्पं विचित्य रिक्तस्थानपूर्तिः।**<br>**एतेषु विषयेषु कमपि एकं विषयम् अधिकृत्य परीक्षा-पत्र-निर्माता प्रश्नं प्रष्टुं शक्नोति।** | ½×**4=2** |

***********************************************************

**प्रश्ननिर्माणकर्ता अशुद्धिसंशोधकश्च**

**आचार्य नरेश मलोटिया**

**टीजीटी-संस्कृतम्**

**राजकीय-उत्कृष्ट-वरिष्ठ-माध्यमिक-विद्यालय: (कन्या) नादौन:**

**डाकगृहम्- नादौन:, मण्डलम्- नादौन:, जनपदः- हमीरपुर:**

**(हिमाचल प्रदेश:)- 177033**

**दूरवाणी- सङ्केत:- 9817707260, 8351007260**

**अणु-सङ्केतः ggsssnadaun@rediffmail.com**

**डॉ. अमन शर्मा**

**टीजीटी-संस्कृतम्**

**राजकीय-उच्च-विद्यालय: चामुक्खा**

**डाकगृहम्- चामुक्खा, मण्डलम्- रक्कड़:, जनपदः- काङ्गड़ा**

**(हिमाचल प्रदेश:)- 177033**

**दूरवाणी- सङ्केत:- 8894337243, 8219973147**

**अणु-सङ्केतः ghschamukha123@gmail.com**